॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ८१

तथोक्तवति रामे तु तस्य जन्म तदद्भुतम् ।
उवाच लक्ष्मणो भूयो भरतश्च महायशाः ॥१॥

सा प्रिया सोमपुत्रस्य संवत्सरमथोषिता ।
अकरोत्किं नरश्रेष्ठ तत्त्वं शंसितुमर्हसि ॥२॥

तयोस्तद्वाक्यमाधुर्यं निशम्य परिपृच्छतोः ।
रामः पुनरुवाचेमां प्रजापतिसुते कथाम् ॥३॥

पुरुषत्वं गते शूरे बुधः परमबुद्धिमान् ।
संवर्तं परमोदारमाजुहाव महायशाः ॥४॥

च्यवनं भृगुपुत्रं च मुनिं चारिष्टनेमिनम् ।
प्रमोदनं मोदकरं ततो दुर्वाससं मुनिम् ॥५॥

एतान्सर्वान्समानीय वाक्यज्ञस्तत्त्वदर्शिनः ।
उवाच सर्वान्सुहृदो धैर्येण सुसमाहितः ॥६॥

अयं राजा महाबाहुः कर्दमस्य इलः सुतः ।
जानीतैनं यथा भूतं श्रेयो ह्यस्य विधीयताम् ॥७॥

तेषां संवदतामेव तमाश्रममुपागमत् ।
कर्दमः सुमहातेजा द्विजैः सह महात्मभिः ॥८॥

पुलस्त्यश्च क्रतुश्चैव वषट्कारस्तथैव च ।
ओङ्कारश्च महातेजास्तमाश्रममुपागमन् ॥९॥

ते सर्वे हृष्टमनसः परस्परसमागमे ।
हितैषिणो बाह्लि पतेः पृथग्वाक्यमथाब्रुवन् ॥१०॥

कर्दमस्त्वब्रवीद्वाक्यं सुतार्थं परमं हितम् ।
द्विजाः शृणुत मद्वाक्यं यच्छ्रेयः पार्थिवस्य हि ॥११॥

नान्यं पश्यामि भैषज्यमन्तरेण वृषध्वजम् ।
नाश्वमेधात्परो यज्ञः प्रियश्चैव महात्मनः ॥१२॥

तस्माद्यजामहे सर्वे पार्थिवार्थे दुरासदम् ।
कर्दमेनैवमुक्तास्तु सर्व एव द्विजर्षभाः ।
रोचयन्ति स्म तं यज्ञं रुद्रस्याराधनं प्रति ॥१३॥

संवर्तस्य तु राजर्षिः शिष्यः परपुरञ्जयः ।
मरुत्त इति विख्यतस्तं यज्ञं समुपाहरत् ॥१४॥

ततो यज्ञो महानासीद्बुधाश्रमसमीपतः ।
रुद्रश्च परमं तोषमाजगाम महायशाः ॥१५॥

अथ यज्ञसमाप्तौ तु प्रीतः परमया मुदा ।
उमापतिर्द्विजान्सर्वानुवाचेदमिलां प्रति ॥१६॥

प्रीतोऽस्मि ह्यमेधेन भक्त्या च द्विजसत्तमाः ।
अस्य बाह्लिपतेश्चैव किं करोमि प्रियं शुभम् ॥१७॥

तथा वदति देवेशे द्विजास्ते सुसमाहिताः ।
प्रसादयन्ति देवेशं यथा स्यात्पुरुषस्त्विला ॥१८॥

ततः प्रीतमना रुद्रः पुरुषत्वं ददौ पुनः ।
इलायै सुमहातेजा दत्त्वा चान्तरधीयत ॥१९॥

निवृत्ते ह्यमेधे तु गते चादर्शनं हरे ।
यथागतं द्विजाः सर्वे अगच्छन्दीर्घदर्शिनः ॥२०॥

राजा तु बाह्लिमुत्सृज्य मध्यदेशे ह्यनुत्तमम् ।
निवेशयामास पुरं प्रतिष्ठानं यशस्करम् ॥२१॥

शशबिन्दुस्तु राजासीद्बाह्ल्यां परपुरञ्जयः ।
प्रतिष्ठान इलो राजा प्रजापतिसुतो बली ॥२२॥

स काले प्राप्तवाँल्लोकमिलो ब्राह्ममनुत्तमम् ।
ऐलः पुरूरवा राजा प्रतिष्ठानमवाप्तवान् ॥२३॥

ईदृशो ह्यश्वमेधस्य प्रभावः पुरुषर्षभौ ।
स्त्रीभूतः पौरुषं लेभे यच्चान्यदपि दुर्लभम् ॥२४॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com